# संस्कृत-वार्ताः

**दिनाङ्कः- 26.10.2025** **सायम् - 06:20**

## मुख्यवार्ताः

- प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् अनिश्चिततायाः काले भारत-आसियानयोः मध्ये समग्र-सामरिकसहभागित्वेन सुस्थिरप्रगतिः दृश्यते, षट्विंशत्यधिक द्विसहस्रतम वर्षम् आसियान्-भारत-समुद्रीयसहयोगस्य वर्षम् इति घोषितवान्।
- प्रधानमन्त्री श्री मोदी अवोचत् यत् आपरेशन सिन्दूर इत्यनेन प्रत्येकः भारतीयः गर्वेन पूरितः अस्ति, सहैव जी. एस. टी. बचत उत्सवस्य विषये तेषु उत्साहः दृश्यते।
- उपराष्ट्रपतिः सी.पी. राधाकृष्णन् वर्यः सेशेल्स-देशस्य द्विदिवसीय यात्रायाम् नवनिर्वाचितस्य राष्ट्रपतेः डॉ. पैट्रिक-हर्मिनी-महोदयस्य शपथग्रहण-समारोहे भाग ग्राहणाय अद्य मध्याह्ने तत्र सम्प्राप्तवान्।
- अद्य पञ्चविंशत्यधिक द्विसहस्रतम वर्षस्य राष्ट्रिय-विज्ञान-पुरस्काराः घोषिताः। प्रो. जयंत विष्णु नार्लिकर इत्यस्मै मरणोपरान्तं विज्ञानरत्नपुरस्कारः प्रदीयते।
- आन्ध्रप्रदेशः पुदुचेरी राज्यौ च मोन्था-चक्रवातस्य अनुरूपं सुरक्षोपायाः कृतवन्तौ।

## प्रधानमन्त्री आसियान

एकविंशति शताब्दिः भारतस्य, आसियान-देशस्य च शताब्दिः इति प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तम्। मलेशिया-देशे आयोजिते आसियान-भारत-शिखरसम्मेलनम् आभासीय-माध्यमेन सम्बोधयन्, श्रीमोदी अधोरेखितवान् यत् भारतं आसियान् च मिलित्वा विश्वस्य जनसंख्यायाः प्रायः चतुर्थांशस्य प्रातिनिधित्वं कुर्वन्ति। प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् अनिश्चिततायाः काले भारत-आसियानयोः मध्ये समग्र-सामरिकसहभागित्वेन सुस्थिरप्रगतिः दृश्यते, षट्विंशत्यधिक द्विसहस्रतम वर्षम् आसियान्-भारत-समुद्रीयसहयोगस्य वर्षम् इति घोषितवान्।

## प्रधानमन्त्री

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य उक्तं यत् छठ महापर्वः संस्कृतेः, प्रकृतेः, समाजस्य च सुदृढ़-एकतायाः प्रतिबिम्बः अस्ति । आकाशवाण्याः स्वकीये मन की बात इत्यस्मिन् कार्यक्रमे राष्ट्रं संबोधयन्, प्रधानमन्त्री छठपूजोत्सवावसरे सर्वेभ्यः, विशेषतः बिहारस्य, झारखण्डस्य, पूर्वांचलस्य च जनेभ्यः शुभाशयाः प्रेषितवान्। सम्पूर्णः देशः उत्सवे निमग्नः अस्ति तथा च भक्त्याः, स्नेहस्य, परम्परायाः च सङ्गमः दृश्यते इति श्रीमोदी उक्तवान्। सः उक्तवान् यत् छठ् पूजायाः अवसरे महिलाः येन समर्पणेन भक्त्या च उपवासं कुर्वन्ति तत् प्रेरकं भवति । सद्यः एव श्रीमोदी सर्वेभ्यः नागरिकेभ्यः पत्रम् अलिखत्, स्वस्य पत्रे, सः देशस्य उपलब्धिनां उल्लेखं कृतवान्। अस्य पत्रस्य प्रतिक्रियारूपेण बहवः नागरिकाः तस्मै पुनः पत्रं लिखितवन्तः। श्रीमोदी अवोचत् यत् आपरेशन सिन्दूर इत्यनेन प्रत्येकः भारतीयः गर्वेन पूरितः अस्ति। सः अवदत् यत् अस्मिन् समये तेषु क्षेत्रेषु अपि आनन्दस्य दीपानि प्रज्वलितानि यत्र माओवादिनाम् आतङ्कः आसीत्। प्रधानमंत्रीः अवदत् यत् सः प्रसन्नः अस्ति यत् जी. एस. टी. बचत उत्सवस्य विषये जनेषु उत्साहः दृश्यते।

स्वच्छतायाः प्रयासानां विषये देशस्य विभिन्नानां नगराणां काश्चन प्रेरककथाः प्रधानमन्त्रिणा प्रकाशिताः। सः अवदत् यत् धोलेराम अतिरिच्य गुजरातस्य कच्छ-प्रदेशे मैङ्ग्रोव-वृक्षाणां रोपणं द्रुतगत्या प्रचलति। कोरी-क्रीक इत्यत्र 'मैङ्ग्रोव-लर्निङ्ग-सेण्टर' इत्यस्य स्थापनापि कृतास्ति। प्रधानमन्त्रिणा जनान् यत्र यत्र निवसन्ति तत्र वृक्षाः रोपयितुं तथा 'एक पेड़ मा के नाम्' इति अभियानस्य प्रचाराय च आहूतम्। श्रीमोदी उक्तवान् यत् अक्टूबर मासस्य एकत्रिंशत् दिनाङ्के आचर्यमाणस्य सरदार पटेलस्य सार्धैकशततमं जन्मदिवसः सम्पूर्णस्य देशस्य कृते अतीव विशिष्टः अवसरः अस्ति। तेनोदिरितं यत् सरदार पटेलः आधुनिककाले राष्ट्रस्य महा पुरुषेषु अन्यतमः अस्ति, तस्य उदात्तं व्यक्तित्वे अनेकाः गुणाः अन्तर्भवन्ति।

श्रीमोदी भारतस्य राष्ट्रगीतस्य वंदे मातरम् इत्यस्य विषये अपि उक्तवान्। सः अवदत् यत् देशभक्तिः शब्दातीतः भावः अस्ति, तथा च वंदे मातरम् इति गीतम् अमूर्तभावं मूर्तस्वररूपं प्रददाति।

श्रीमोदी अवदत् यत् कुमारम् भीमस्य जन्मदिवस: अक्टोबर्-मासस्य द्वाविंशति दिनाङ्के आचर्यते। तेलङ्गाना-राज्यस्य जनाः अद्य आकाशवाणी इत्यत्र मन की बात इत्यस्मिन् कार्यक्रमे प्रधानमन्त्रिणः नरेन्द्रमोदिनः आदिवासी-योद्धायाः कुमारम् भीम वर्यस्य योगदानस्य स्मरणे अतीव हर्षं प्रकटितवन्तः। आकाशवाण्या सह वार्तालापं कुर्वन्, कुमारम् भीम वर्यस्य प्रपौत्रः कुमारम् सोनेराव इत्येषः, स्वस्य प्रपितामहस्य कृतानां योगदानानां उल्लेखनाय प्रधानमन्त्रिणं प्रति धन्यतावचांसि प्रकटितवान्।

**शपथग्रहण-समारोहे**

उपराष्ट्रपति: सी.पी. राधाकृष्णन् वर्य: सेशेल्स-देशस्य द्विदिवसीय यात्रायाम् अद्य मध्याह्ने तत्र सम्प्राप्तवान्। यत्र स: नवनिर्वाचितस्य राष्ट्रपतेः डॉ. पैट्रिक-हर्मिनी-महोदयस्य शपथग्रहण-समारोहे भागं ग्रहीष्यति।

**खरना**

अद्य खरना इति नाम्ना प्रसिद्धस्य छठ-पूजायाः द्वितीयः दिवसः अस्ति। अस्मिन् दिने भक्ताः सूर्योदयात् सूर्यास्तपर्यन्तं भोजनं जलं च त्यक्त्वा व्रतं धारयन्ति। सूर्यास्तसमये सूर्यदेवाय नैवेद्यं कृत्वा एव किमपि स्वीकुर्वन्ति। चतुर्दिवसीया छठ-पूजा ह्यः नहाय-खाय इत्यनेन समारब्धम्। सूर्यदेवस्य, तस्य भगिन्याः छठी-मैया इत्यस्याः पूजायै समर्पितः अयं उत्सवः पवित्रतायाः, कृतज्ञतायाः, कुटुम्बस्य कल्याणस्य च महत्त्वं प्रकाशयति।

**राष्ट्रिय-विज्ञान-पुरस्कार:**

अद्य पञ्चविंशत्यधिक द्विसहस्रतम वर्षस्य राष्ट्रिय-विज्ञान-पुरस्काराः घोषिताः। प्रो. जयंत विष्णु नार्लिकर इत्यस्मै मरणोपरान्तं विज्ञानरत्नपुरस्कारः प्रदीयते। विज्ञान्-श्री-पुरस्काराय अष्टवैज्ञानिकाः चितास्सन्ति। विज्ञान-युवा-प्रवर्गस्य अन्तर्गतं चतुर्दश युवविज्ञानिकाः चयनिताः सन्ति।

**मौसम**

भारत-ऋतु-विभागेन उक्तं यत् दक्षिणपूर्व-बङ्गाल-खात्याः उपरि विद्यमानः अवसादः श्वः पर्यन्तं चक्रवात-रूपेण तीव्रः भवितुम् अर्हतीति। मङ्गलवासरपर्यन्तं चक्रवातः वायव्यदिशि गच्छन् तीव्रतर-चक्रवात-रूपेण तीव्रः भविष्यति। एतदतिरिच्य, आन्ध्रप्रदेशः पुदुचेरी च मोन्था-चक्रवातस्य अनुरूपं सुरक्षोपायाः कृतवन्तौ।

**चेस**

चतुरङ्ग-क्रीडायां, भारतीय-क्रीडकः गुकेश डोम्माराजुः दिव्या देशमुख: च सद्यः एव आयोजिते पञ्चविंशत्यधि द्विसहस्रतम वर्षस्य यूरोपीय-चेस-क्लब-चषक-क्रीडायाम् उभावपि स्वर्णपदके प्राप्तवन्तौ।

**॥ इति वार्ताः ॥**